एषा ..............



एषः ..............



एतत् ..............



एषः ..............



एतत् ..............



एषा ..............

©KTBS NOT TO BE REPUBLISHED

पञ्चमः पाठः

# तद्-एतद् (पुं)









**सः** बालकः।
सः कः ?
सः बालकः।

**एषः** सैनिकः ।
एषः कः ?
एषः सैनिकः









**तौ** बालकौ।
तौ कौ ?
तौ बालकौ ।

**एतौ** सैनिकौ ।
एतौ कौ ?
एतौ सैनिकौ।









**ते** बालकाः ।
ते के?
ते बालकाः

**एते** सैनिकाः।
एते के ?
एते सैनिकाः।

@KTBS
NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| **स:** | **तौ** | **ते** |
| **एष:** | **एतौ** | **एते** |
| **क:** | **कौ** | **के** |
| बालक: | बालकौ | बालका: |
| सैनिक: | सैनिकौ | सैनिका: |

## अभ्यास:

### I पठनाभ्यास: (उच्चै: पठत)

| | | |
|---|---|---|
| छात्र: | छात्रौ | छात्रा: |
| अश्व: | अश्वौ | अश्वा: |
| बाल: | बालौ | बाला: |
| पिक: | पिकौ | पिका: |
| मनुष्य: | मनुष्यौ | मनुष्या: |

### II पदानाम् अर्थं मातृभाषया लिखत।

| | | |
|---|---|---|
| कर: =.......... | हय: =.......... | नर: =.......... |
| घट: =.......... | कट: =.......... | तट: =.......... |
| अज: =.......... | रथ: =.......... | शुक: =.......... |
| सेवक: =.......... | भास्कर: =.......... | भ्रमर: =.......... |
| कन्दुक: =.......... | शिक्षक: =.......... | भिक्षुक: =.......... |

@KTBS NOT TO BE REPUBLISHED

## III रिक्तं स्थानं पूरयत।

| | | |
|---|---|---|
| अजः | अजौ | |
| | रामौ | रामाः |
| शकटः | | शकटाः |
| घटः | घटौ | |
| | शुकौ | शुकाः |

NOT TO BE REPUBLISHED @KTBS

## IV उदाहरणानुसारं लिखत।

उदा→

| | | | | | |
|---|---|---|---|---|---|
| एषः | शुकः | एतौ | शुकौ | एते | शुकाः |
| | भिक्षुकः | | भिक्षुकौ | | भिक्षुका; |
| | शकटः | | शकटौ | | शकटाः |
| | रथः | | रथौ | | रथाः |

उदा→

| | | | | | |
|---|---|---|---|---|---|
| सः | नरः | तौ | नरौ | ते | नराः |
| | भास्करः | | भास्करौ | | भास्कराः |
| | शूरः | | शूरौ | | शूराः |
| | धीरः | | धीरौ | | धीराः |

अवगच्छत।

**गणेशः** प्रथमो देवः **गणेशं** नौमि साञ्जलिः ।
**गणेशेन** सुसिद्धिर्मे **गणेशाय** नमो नमः ।।

**गणेशात्** लभते ज्ञानं **गणेशस्य** स्तुतिः शुभा।

**गणेशे** भक्तिमानस्मि हे **गणेश** शुभंकुरु।

सङ्ग्रहः -श्लोकसिद्धान्तकौमुदी

@KTBS
NOT TO BE REPUBLISHED

षष्ठः पाठः

# तद्-एतद् (स्त्री)



**सा** बालिका।

सा का ?

सा बालिका।





**एषा वैद्या।**

एषा का ?

**एषा वैद्या।**



**ते** बालिके।

ते के ?

ते बालिके ।





**एते वैद्ये।**

एते के ?

एते **वैद्ये।**



**ताः** बालिकाः ।

ताः काः ?

ताः बालिकाः





**एताः वैद्याः।**

एताः काः ?

एताः **वैद्याः।**

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| **सा** | **ते** | **ताः** |
| **एषा** | **एते** | **एताः** |
| **का** | **के** | **काः** |
| बालिका | बालिके | बालिकाः |
| वैद्या | वैद्ये | वैद्याः |

## अभ्यासः

**I पठनाभ्यासः (उच्चैः पठत)**

| | | |
|---|---|---|
| महिला | महिले | महिलाः |
| कथा | कथे | कथाः |
| वीणा | वीणे | वीणाः |
| अजा | अजे | अजाः |
| बाला | बाले | बालाः |

@KTBS NOT TO BE REPUBLISHED

**II पदानाम् अर्थं मातृभाषया लिखत।**

| | | |
|---|---|---|
| शाला =.......... | शाखा =.......... | कन्या =.......... |
| रसना =.......... | अनुजा =.......... | चटका =.......... |
| नासिका =.......... | भाषा =.......... | पेटिका =.......... |
| वनिता =.......... | मृत्तिका =.......... | कुञ्चिका =.......... |
| छाया =.......... | वीणा =.......... | कथा =.......... |

## III रिक्तं स्थानं पूरयत।

| | | |
|---|---|---|
| भाषा | | भाषाः |
| | नासिके | नासिकाः |
| मृत्तिका | मृत्तिके | |
| वनिता | | वनिताः |
| | पेटिके | पेटिकाः |

## IV उदाहरणानुसारं लिखत।

उदा→

| | | | | | |
|---|---|---|---|---|---|
| एषा | कन्या | एते | कन्ये | एताः | कन्याः |
| | ललना | | ललने | | ललनाः |
| | छाया | | छाये | | छायाः |

उदा→

| | | | | | |
|---|---|---|---|---|---|
| सा | अनुजा | ते | अनुजे | ताः | अनुजाः |
| | कथा | ते | | | कथाः |
| सा | | | महिले | ताः | |

@KTBS NOT TO BE REPUBLISHED

**अवगच्छत।**

**रमा** कन्या समुद्रस्य **रमां** वन्दे हरिप्रियाम्
**रमया** रमते विष्णुः **रमायै** क्रियते नमः ।
**रमायाः** काधिका नारी **रमायाः** सेवको जनः
**रमायाम्** अनुरक्तस्य हे **रमे** रमसे सदा ।।

सङ्ग्रहः - श्लोकसिद्धान्तकौमुदी

# तद्-एतद् (नपुं)








**तत्** पुस्तकम्
तत् किम् ?
तत् पुस्तकम् ।

**एतत्** पर्णम्
एतत् किम् ?
एतत् पर्णम्।








**ते** पुस्तके।
ते के?
ते पुस्तके।

**एते** पर्णे ।
एते के?
एते पर्णे।








**तानि** पुस्तकानि ।
तानि कानि ?
तानि पुस्तकानि ।

**एतानि** पर्णानि ।
एतानि कानि?
एतानि पर्णानि ।

@KTBS NOT TO BE REPUBLISHED

| | | |
|---|---|---|
| **तत्** | **ते** | **तानि** |
| **एतत्** | **एते** | **एतानि** |
| **किं** | **के** | **कानि** |
| पुस्तकम् | पुस्तके | पुस्तकानि |
| पर्णम् | पर्णे | पर्णानि |

## अभ्यासः

## I पठनाभ्यासः (उच्चैः पठत)

| | | |
|---|---|---|
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| मस्तकम् | मस्तके | मस्तकानि |
| मन्दिरम् | मन्दिरे | मन्दिराणि |
| नेत्रम् | नेत्रे | नेत्राणि |
| भवनम् | भवने | भवनानि |

## II पदानाम् अर्थं मातृभाषया लिखत।

| | | |
|---|---|---|
| नेत्रम् =.......... | जलम् =.......... | वनम् =.......... |
| धनम् =.......... | पर्णम् =.......... | गृहम् =.......... |
| शरीरम् =.......... | भवनम् =.......... | पुस्तकम् =.......... |
| द्वारम् =.......... | रक्तम् =.......... | पत्रम् =.......... |
| फलम् =.......... | मन्दिरम् =.......... | यानम् =.......... |

NOT TO BE REPUBLISHED @KTBS

## III रिक्तं स्थानं पूरयत।

| | | | |
|---|---|---|---|
| | पर्णम् | | पर्णानि |
| धने | धनानि | | |
| | बालः | | बालाः |
| | | शुकौ | शुकाः |
| | वीणा | वीणे | |
| | वनिता | वनिते | |

## IV उदाहरणानुसारं लिखत।

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा→ | एतत् | कमलम् | एते | कमले | एतानि | कमलानि |
| | एतत् | | | भवने | | भवनानि |
| | | शास्त्रम् | एते | | एतानि | |
| | एतत् | | | गृहे | | गृहाणि |

उदा→

| | | | | | |
|---|---|---|---|---|---|
| तत् | भवनम् | ते | भवने | तानि | भवनानि |
| | पर्णं | ते | | | पर्णानि |
| तत् | | | गृहे | | गृहाणि |
| | नेत्रं | ते | | | नेत्राणि |

© KTBS NOT TO BE REPUBLISHED

अवगच्छत।

**ज्ञानं ज्ञाने** च **ज्ञानानि** वस्तूनां सन्तु सर्वदा ।
**ज्ञानं ज्ञाने** च **ज्ञानानि** दत्ते विद्यालये गुरुः ।।
**ज्ञानेन** सह **ज्ञानाभ्यां ज्ञानैः** संशोभते वपुः ।
**ज्ञानाय** पाठ्यतां **ज्ञानात्** विना विप्रो न शोभते।।
**ज्ञानस्य** च फलं मानः **ज्ञाने** सति जयो भवेत् ।

@KTBS
NOT TO BE REPUBLISHED

# नामपदम्

## अकारान्तः पुंलिङ्गः 'देव'शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा ಉ | देवः ದೇವನು | देवौ ಇಬ್ಬರು ದೇವರು | देवाः ದೇವರು |
| सम्बोधनप्रथमा ಹೇ ಎಲೈ | हे देव ಹೇ ದೇವನೇ | हे देवौ ಹೇ ಇಬ್ಬರು ದೇವರೇ | हे देवाः ಹೇ ದೇವರೇ |
| द्वितीया ಅನ್ನು | देवम् ದೇವನನ್ನು | देवौ ಇಬ್ಬರು ದೇವರನ್ನು | देवान् ದೇವರನ್ನು |
| तृतीया ಇಂದ | देवेन ದೇವನಿಂದ | देवाभ्याम् ಇಬ್ಬರು ದೇವರಿಂದ | देवैः ದೇವರಿಂದ |
| चतुर्थी ಗೆ, ಇಗೆ, ಕ್ಕೆ | देवाय ದೇವನಿಗೆ | देवाभ्याम् ಇಬ್ಬರು ದೇವರಿಗೆ | देवेभ्यः ದೇವರಿಗೆ |
| पञ्चमी ದೆಸೆಯಿಂದ | देवात् ದೇವನ ದೆಸೆಯಿಂದ | देवाभ्याम् ಇಬ್ಬರು ದೇವರ ದೆಸೆಯಿಂದ | देवेभ्यः ದೇವರ ದೆಸೆಯಿಂದ |
| षष्ठी ಅ | देवस्य ದೇವನ | देवयोः ಇಬ್ಬರು ದೇವರ | देवानाम् ದೇವರ |
| सप्तमी ಅಲ್ಲಿ | देवे ದೇವನಲ್ಲಿ | देवयोः ಇಬ್ಬರು ದೇವರಲ್ಲಿ | देवेषु ದೇವರಲ್ಲಿ |

## आकारान्तः स्त्रीलिङ्गः 'सीता' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सीता | सीते | सीताः |
| सम्बोधनप्रथमा | हे सीते | हे सीते | हे सीताः |
| द्वितीया | सीताम् | सीते | सीताः |
| तृतीया | सीतया | सीताभ्याम् | सीताभिः |
| चतुर्थी | सीतायै | सीताभ्याम् | सीताभ्यः |

© KTBS NOT TO BE REPUBLISHED

| | | | |
|---|---|---|---|
| पञ्चमी | सीतायाः | सीताभ्याम् | सीताभ्यः |
| षष्ठी | सीतायाः | सीतयोः | सीतानाम् |
| सप्तमी | सीतायाम् | सीतयोः | सीतासु |

## अकारान्तः नपुंसकलिङ्गः 'वन' शब्दः

| विभक्तिः | एकवचनम् | द्विवचम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वनम् | वने | वनानि |
| सम्बोधनप्रथमा | हे वन | हे वने | हे वनानि |
| द्वितीया | वनम् | वने | वनानि |
| तृतीया | वनेन | वनाभ्याम् | वनैः |
| चतुर्थी | वनाय | वनाभ्याम् | वनेभ्यः |
| पञ्चमी | वनात् | वनाभ्याम् | वनेभ्यः |
| षष्ठी | वनस्य | वनयोः | वनानाम् |
| सप्तमी | वने | वनयोः | वनेषु |

@KTBS NOT TO BE REPUBLISHED

### विशेषांशाः

**रामो** राजमणिः सदा विजयते **रामं** रमेशं भजे।
**रामेणा**भिहता निशाचरचमू **रामाय** तस्मै नमः ।।
**रामात्** नास्ति परायणं परतरं **रामस्य** दासोऽस्म्यहम्।
**रामे** चित्तलयः सदा भवतु मे भो! **राम** मामुद्धर।।

### लट् लकारः - पठ् धातुः - वर्तमानकालः

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः<br>III person | रामः<br>सीता<br>सः<br>सा<br>तत्<br>— पठति | रामौ<br>सीते<br>तौ<br>ते<br>ते<br>— पठतः | रामाः<br>सीताः<br>ते<br>ताः<br>तानि<br>— पठन्ति |
| मध्यमपुरुषः<br>II person | त्वम् — पठसि | युवाम् — पठथः | यूयम् — पठथ |
| उत्तमपुरुषः<br>I person | अहम् — पठामि | आवाम् — पठावः | वयम् — पठामः |

**एवम्** - खादति, भवति, गच्छति, धावति, पश्यति

## विशेषधातुरूपाणि

### लट् लकारः - अस् धातुः

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | (बालकः) अस्ति | (बालकौ) स्तः | (बालकाः) सन्ति |
| **मध्यमपुरुषः** | (त्वम् ) असि | (युवां) स्थः | (यूयम्) स्थ |
| **उत्तमपुरुषः** | (अहम्) अस्मि | (आवाम्) स्वः | (वयम्) स्मः |

@KTBS NOT TO BE REPUBLISHED

## लट् लकारः - कृ धातुः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | (स :) करोति | (तौ) कुरुतः | (ते) कुर्वन्ति |
| **मध्यमपुरुषः** | (त्वम् ) करोषि | (युवाम्) कुरुथः | (यूयम्) कुरुथ |
| **उत्तमपुरुषः** | (अहम्) करोमि | (अवाम्) कुर्वः | (वयम्) कुर्मः |

@KTBS
NOT TO BE REPUBLISHED

# अष्टमः पाठः



शिशुः **क्षीरं** पिबति।



गजः **इक्षुदण्डं** खादति।



छात्रः **पाठं** पठति



बाला **शालां** गच्छति।



बालाः **कन्दुकेन** क्रीडन्ति



शिक्षकः **सुधाखण्डेन** लिखति



माता **हस्तेन** ददाति



रमेशः **द्विचक्रिकया** गच्छति।

@KTBS NOT TO BE REPUBLISHED

| | |
|---|---|
| राजेशः शालां गच्छति। | राधा वस्त्रं क्षालयति |
| बालाः पाठान् पठन्ति। | महिलाः श्लोकं गायन्ति। |
| हरिहरौ गीतं गायतः। | सेवकः भारं वहति। |
| जनाः नेत्राभ्यां पश्यन्ति। | पिता हस्तेन यच्छति। |
| छात्राः लेखन्या लिखन्ति। | अश्वः वेगेन धावति। |

## अभ्यासः

## I. पठनाभ्यासः (उच्चैः पठत)

| | | |
|---|---|---|
| क्षीरम् | क्षीरे | क्षीराणि |
| वस्त्रं | वस्त्रे | वस्त्राणि |
| कथां | कथे | कथाः |
| नेत्रेण | नेत्राभ्यां | नेत्रैः |
| कर्णेन | कर्णाभ्यां | कर्णैः |
| हस्तेन | हस्ताभ्यां | हस्तैः |

@KTBS NOT TO BE REPUBLISHED

## II. एकवाक्येन उत्तरं लिखत ।

१. गजः किं खादति?

उ.........................................................

२. कः क्षीरं पिबति?

उ.........................................................

३. का वस्त्रं क्षालयति?

उ.........................................................

४) काः लेखन्या लिखन्ति ?

उ..................................................

५) सेवकः किं वहति ?

उ......................................................

## III. रिक्तं स्थानं पूरयत।

१. अश्वः .......................धावति।

२. बालाः पाठान्......................।

३. ................सुधाखण्डेन लिखति।

४. माता...............ददाति।

५. ..................द्विचक्रिकया गच्छति।

## IV. वाक्यनिर्माणं कुरुत।

| | | |
|---|---|---|
| शिशुः, बालौ<br>अश्वः, शिक्षकः<br>राजेशः | पाठं<br>क्षीरं<br>वेगेन<br>शालां<br>मन्दिरम् | धावति<br>पाठयति<br>गच्छति<br>गच्छतः<br>पिबति |

१ ....................................

२ ....................................

३ ....................................

४ ....................................

५ ....................................

©KTBS NOT TO BE REPUBLISHED

## **नवमः पाठः** चतुर्थी-पञ्चमी



माता **पुत्राय** लड्डुकं यच्छति।



**शारदायै** नमः।



देवः **भक्ताय** वरं ददाति।



**गणेशाय** नमः ।



फलं **वृक्षात्** पतति।



बालिका **शालायाः** आगच्छति।



बालकः **क्रीडाङ्गणात्** आगच्छति।



वृष्टिः **मेघात्** पतति।

@KTBS
NOT TO BE REPUBLISHED

तातः पुत्राय.पत्रिकां ददाति।
अम्बा बालाय क्षीरं यच्छति।
बालः मित्राय चाकलेहं ददाति।
शिक्षिका छात्राय ज्ञानं ददाति।
बालिका अम्बायै नमः इति वदति।
पुरुषः महिलायै गौरवं यच्छति।

छात्रः शालायाः आगच्छति।
वरुणः आपणात् पुस्तकम् आनयति।
शिशुः पर्यङ्कात् पतति।
पुत्रः अम्बायाः मधुरं स्वीकरोति।
छात्रा कक्ष्यायाः गच्छति।
नदी पर्वतात् प्रवहति।

## अभ्यासः

### I. पठनाभ्यासः (उच्चैः पठत)

| | | |
|---|---|---|
| पुत्राय | पुत्राभ्याम् | पुत्रेभ्यः |
| छात्राय | छात्राभ्याम् | छात्रेभ्यः |
| अम्बायै | अम्बाभ्याम् | अम्बाभ्यः |
| महिलायै | महिलाभ्याम् | महिलाभ्यः |
| वनात् | वनाभ्याम् | वनेभ्यः |
| पर्वतात् | पर्वताभ्याम् | पर्वतेभ्यः |
| शालायाः | शालाभ्याम् | शालाभ्यः |
| कक्ष्यायाः | कक्ष्याभ्याम् | कक्ष्याभ्यः |
| फलात् | फलाभ्याम् | फलेभ्यः |
| ग्रामात् | ग्रामाभ्याम् | ग्रामेभ्यः |
| पुस्तकात् | पुस्तकाभ्याम् | पुस्तकेभ्यः |

@KTBS NOT TO BE REPUBLISHED

II. कोष्टकम् अवलोक्य वाक्यानि रचयत।




उदाहरणं - शिक्षिका कस्मै किं यच्छति?

| | | |
|---|---|---|
| शिक्षिका | अक्षयाय पुस्तकं | यच्छति। |
| ........ | ........ | ....... |
| ........ | ........ | ........ |
| ........ | ........ | ........ |
| ........ | ........ | ........ |
| ........ | ........ | ........ |

@KTBS
NOT TO BE REPUBLISHED

III. **कोष्टकम् अवलोक्य वाक्यानि रचयत।**



उदाहरणम् → बालकः कुतः कुत्र गच्छति?

| | | | |
|---|---|---|---|
| बालकः | गृहात् | उद्यानं | गच्छति |
| .......... | .......... | .......... | ..........। |
| .......... | .......... | .......... | ..........। |
| .......... | .......... | .......... | ..........। |
| .......... | .......... | .......... | ..........। |
| .......... | .......... | .......... | ..........। |

**अवगच्छत।**

**एकश्लोकीमहाभारतम्**

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनम्
द्यूते श्रीहरणं वने विहरणं मत्स्यालये वर्धनम् ।
लीलागोग्रहणं रणे वितरणं सन्धिक्रियाजृम्भणम्
भीष्मद्रोणसुयोधनादिमथनं एतन्महाभारतम्।।

© KTBS NOT TO BE REPUBLISHED

⌘⌘⌘⌘⌘⌘

# दशमः पाठः

**षष्ठी-सप्तमी**



**गणेशस्य** वाहनं मूषकः ।



कृष्णस्य वाहनं द्विचक्रिका।



**गङ्गायाः** तटे काशी अस्ति।



तत् **मम** गृहम् अस्ति।



सिंहः **वने** वसति।



छात्राः कक्ष्यायां लिखन्ति।



आभरणं **कर्णे** अस्ति।



पुष्पं **लतायां** भवति

©KTBS
NOT TO BE REPUBLISHED

दिलीपस्य गृहं सुन्दरम् अस्ति।

सुधीरस्य माता वस्त्राणि क्षालयति।

रमेशस्य भगिनी लड्डुकं वितरति।

एषः सीतायाः पतिः।

एतत् रामस्य धनुः ।

गणेशः पार्वत्याः पुत्रः ।

कुबेरः धनस्य अधिपतिः ।

महिषः यमस्य वाहनम्।

शिवस्य आयुधं त्रिशूलम् ।

सागरस्य तरङ्गाः भयं जनयन्ति।

कासारे मीनाः सञ्चरन्ति।

आकाशे नक्षत्राणि शोभन्ते ।

पक्षिणः नीडे निवसन्ति।

छात्राः अध्ययने निरताः सन्ति।

वृक्षेषु फलानि फलन्ति।

क्रूरमृगाः वने निवसन्ति।

उत्पीठिकायां पुस्तकम् अस्ति।

बालाः क्रीडाङ्गणे क्रीडन्ति।

उषःकाले सूर्यः उदेति।

बेङ्गलूरुनगरे विधानसौधः अस्ति।

@KTBS
NOT TO BE REPUBLISHED

## अभ्यासः

### I. पठनाभ्यासः (उच्चैः पठत)

| | | |
|---|---|---|
| दिलीपस्य | दिलीपयोः | दिलीपानाम् |
| रमेशस्य | रमेशयोः | रमेशाणाम् |
| उदरस्य | उदरयोः | उदराणाम् |
| कन्दुकस्य | कन्दुकयोः | कन्दुकानाम् |
| गङ्गायाः | गङ्गयोः | गङ्गानाम् |
| लतायाः | लतायोः | लतानाम् |
| कासारे | कासारयोः | कासारेषु |
| वने | वनयोः | वनेषु |
| वृक्षे | वृक्षयोः | वृक्षेषु |
| गगने | गगनयोः | गगनेषु |
| पादे | पादयोः | पादेषु |
| उत्पीठिकायाम् | उत्पीठिकयोः | उत्पीठिकासु |
| लतायाम् | लतयोः | लतासु |

©KTBS NOT TO BE REPUBLISHED

## II. रिक्तं स्थानं पूरयत।

१) कुबेरः ................ अधिपतिः । (धनम्)

२) रावणः .............. राजा। (लङ्का)

३) त्रिशूलम् ............ आयुधम्। (शिवः)

४) महिषः ................. वाहनम्।( यमः)

५) बालाः ............... क्रीडन्ति।(नीडम्)

६) पक्षिणः ............... निवसन्ति। (नीडम्)

७) पुस्तकम्............... अस्ति। (स्यूतः)

८) .................. मीनाः इतस्ततः सञ्चरन्ति। (जलम्)

९) पर्णम्................ अस्ति। (वृक्षः)

१०) अन्नं.................. अस्ति। (स्थालिका)

@KTBS NOT TO BE REPUBLISHED

**भाषाभ्यासः**

✻ प्रथमातः सप्तमीविभक्तिपर्यन्तम् एकैकं वाक्यं त्रिषु लिङ्गेषु रचयत।

## अभ्यासं कुरुत

### दकारान्तः पुंलिङ्गः 'तद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा ಉ | सः ಅವನು | तौ ಅವರಿಬ್ಬರು | ते ಅವರು |
| द्वितीया ಅನ್ನು | तम् ಅವನನ್ನು | तौ ಅವರಿಬ್ಬರನ್ನು | तान् ಅವರನ್ನು |
| तृतीया ಇಂದ | तेन ಅವನಿಂದ | ताभ्याम् ಅವರಿಬ್ಬ-ರಿಂದ | तैः ಅವರಿಂದ |
| चतुर्थी ಗೆ, ಇಗೆ, ಕ್ಕೆ | तस्मै ಅವನಿಗೆ | ताभ्याम् ಅವರಿಬ್ಬರಿಗೆ | तेभ्यः ಅವರಿಗೆ |
| पञ्चमी ದೆಸೆಯಿಂದ | तस्मात् ಅವನ ದೆಸೆಯಿಂದ | ताभ्याम् ಅವರಿಬ್ಬರ ದೆಸೆಯಿಂದ | तेभ्यः ಅವರ ದೆಸೆಯಿಂದ |
| षष्ठी ಅ, | तस्य ಅವನ | तयोः ಅವರಿಬ್ಬರ | तेषाम् ಅವರ |
| सप्तमी ಅಲ್ಲಿ | तस्मिन् ಅವನಲ್ಲಿ | तयोः ಅವರಿಬ್ಬರಲ್ಲಿ | तेषु ಅವರಲ್ಲಿ |

### दकारान्तः पुंलिङ्गः 'एतद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा ಉ | एषः ಇವನು | एतौ ಇವರಿಬ್ಬರು | एते ಇವರು |
| द्वितीया ಅನ್ನು | एतम् ಇವನನ್ನು | एतौ ಇವರಿಬ್ಬರನ್ನು | एतान् ಇವರನ್ನು |
| तृतीया ಇಂದ | एतेन ಇವನಿಂದ | एताभ्याम् ಇವರಿಬ್ಬ-ರಿಂದ | एतैः ಇವರಿಂದ |
| चतुर्थी ಗೆ, ಇಗೆ, ಕ್ಕೆ | एतस्मै ಇವನಿಗೆ | एताभ्याम् ಇವರಿಬ್ಬರಿಗೆ | एतेभ्यः ಇವರಿಗೆ |
| पञ्चमी ದೆಸೆಯಿಂದ | एतस्मात् ಇವನ ದೆಸೆಯಿಂದ | एताभ्याम् ಇವರಿಬ್ಬರ ದೆಸೆಯಿಂದ | एतेभ्यः ಇವರ ದೆಸೆಯಿಂದ |
| षष्ठी ಅ, | एतस्य ಇವನ | एतयोः ಇವರಿಬ್ಬರ | एतेषाम् ಇವರ |
| सप्तमी ಅಲ್ಲಿ | एतस्मिन् ಇವನಲ್ಲಿ | एतयोः ಇವರಿಬ್ಬರಲ್ಲಿ | एतेषु ಇವರಲ್ಲಿ |

© KTBS NOT TO BE REPUBLISHED

## दकारान्तः स्त्रीलिङ्गः 'तद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

@KTBS NOT TO BE REPUBLISHED

## दकारान्तः स्त्रीलिङ्गः 'एतद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम् | एते | एताः |
| तृतीया | एतया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः | एतासु |

## दकारान्तः नपुंसकलिङ्गः 'तद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

@KTBS NOT TO BE REPUBLISHED

## दकारान्तः नपुंसकलिङ्गः 'एतद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

## मकारान्तः पुंलिङ्गः 'किम्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

@KTBS NOT TO BE REPUBLISHED

## मकारान्तः स्त्रीलिङ्गः 'किम्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

## मकारान्तः नपुंसकलिङ्गः 'किम्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

NOT TO BE REPUBLISHED @KTBS

## दकारान्तः त्रिषु लिङ्गेषु समानः 'युष्मद्' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचम् |
|---|---|---|---|
| प्रथमा ಉ | त्वम् ನೀನು | युवाम् ನೀವಿಬ್ಬರು | यूयम् ನೀವು |
| द्वितीया ಅನ್ನು | त्वाम्, त्वा ನಿನ್ನನ್ನು | युवाम्, वाम् ನಿಮ್ಮಿಬ್ಬರನ್ನು | युष्मान्, वः ನಿಮ್ಮನ್ನು |
| तृतीया ಇಂದ | त्वया ನಿನ್ನಿಂದ | युवाभ्याम् ನಿಮ್ಮಿಬ್ಬ-ರಿಂದ | युष्माभिः ನಿಮ್ಮಿಂದ |
| चतुर्थी ಗೆ, ಇಗೆ, ಕ್ಕೆ | तुभ्यम्, ते ನಿನಗೆ | युवाभ्याम्, वाम् ನಿಮ್ಮಿಬ್ಬರಿಗೆ | युष्मभ्यम्, वः ನಿಮಗೆ |
| पञ्चमी ದೆಸೆಯಿಂದ | त्वत् ನಿನ್ನ ದೆಸೆಯಿಂದ | युवाभ्याम् ನಿಮ್ಮಿಬ್ಬರ ದೆಸೆಯಿಂದ | युष्मत् ನಿಮ್ಮ ದೆಸೆಯಿಂದ |

| | | | |
|---|---|---|---|
| षष्ठी ಅ, | तव, ते ನಿನ್ನ | युवयोः, वाम् ನಿಮ್ಮಿಬ್ಬರ | युष्माकम्, वः ನಿಮ್ಮ |
| सप्तमी ಅಲ್ಲಿ | त्वयि ನಿನ್ನಲ್ಲಿ | युवयोः ನಿಮ್ಮಿಬ್ಬರಲ್ಲಿ | युष्मासु ನಿಮ್ಮಲ್ಲಿ |

## दकारान्तः त्रिषु लिङ्गेषु समानः 'अस्मद्' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचम्** |
|---|---|---|---|
| प्रथमा ಉ | अहम् ನಾನು | आवाम् ನಾವಿಬ್ಬರು | वयम् ನಾವು |
| द्वितीया ಅನ್ನು | माम्, मा ನನ್ನನ್ನು | आवाम्, नौ ನಮ್ಮಿಬ್ಬರನ್ನು | अस्मान्, नः ನಮ್ಮನ್ನು |
| तृतीया ಇಂದ | मया ನನ್ನಿಂದ | आवाभ्याम् ನಮ್ಮಿಬ್ಬರಿಂದ | अस्माभिः ನಮ್ಮಿಂದ |
| चतुर्थी ಗೆ, ಇಗೆ, ಕ್ಕೆ | मह्यम्, मे ನನಗೆ | आवाभ्याम्, नौ ನಮ್ಮಿಬ್ಬರಿಗೆ | अस्मभ्यम्, नः ನಮಗೆ |
| पञ्चमी ದೆಸೆಯಿಂದ | मत् ನನ್ನ ದೆಸೆಯಿಂದ | आवाभ्याम् ನಮ್ಮಿಬ್ಬರ ದೆಸೆಯಿಂದ | अस्मत् ನಮ್ಮ ದೆಸೆಯಿಂದ |
| षष्ठी ಅ, | मम, मे ನನ್ನ | आवयोः, नौ ನಮ್ಮಿಬ್ಬರ | अस्माकम्, नः ನಮ್ಮ |
| सप्तमी ಅಲ್ಲಿ | मयि ನನ್ನಲ್ಲಿ | आवयोः ನಮ್ಮಿಬ್ಬರಲ್ಲಿ | अस्मासु ನಮ್ಮಲ್ಲಿ |

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

1. **इतरवचनरूपाणि लिखत।**

| | | | |
|---|---|---|---|
| 1. | तेन | | |
| 2. | | एतौ | |
| 3. | | | तासाम् |
| 4. | एतस्यै | | |
| 5. | | तयोः | |
| 6. | | | एतेषु |

@KTBS NOT TO BE REPUBLISHED

⌘⌘⌘⌘⌘⌘

एकादशः पाठः

# स्तोत्राणि

(कण्ठपाठः करणीयः)



नमस्ते गणनाथाय
गणानां पतये नमः ।
भक्तिप्रियाय देवेश
भक्तेभ्यः सुखदायक ।। १ ।।



गुरुर्ब्रह्मा गुरुर्विष्णुः
गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परब्रह्म
तस्मै श्रीगुरवे नमः ।। २ ।।

लोहितं रथमारूढं
सर्वलोकपितामहम् ।
महापापहरं देवं
तं सूर्यं प्रणमाम्यहम् ।। ३ ।।





दक्षिणे लक्ष्मणो यस्य
वामे तु जनकात्मजा।
पुरतो मारुतिर्यस्य
तं वन्दे रघुनन्दनम् ।। ४ ।।

©KTBS NOT TO BE REPUBLISHED

# स्तोत्राणि

१) गणपतिः
- गणनाथः
- भक्तिप्रियः
- सुरज्येष्ठः
- भक्तानां सुखदायकः

२) गुरुः
- ब्रह्मा
- विष्णुः
- महेश्वरः
- परं ब्रह्मा

३) सूर्यः
- रक्तवर्णः रथारुढः
- सर्वलोक पितामहः
- महापापहरः

४) रामः
- लक्ष्मणः(दक्षिणतः)
- जनकात्मजा(वामतः)
- मारुतिः(पुरतः)

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**I एकवाक्येन उत्तरं लिखत ।**

१) परब्रह्मा कः ?

उ. ........................................

२) रामस्य दक्षिणभागे कः अस्ति ?

उ. ........................................

३) महापापहरः कः ?

उ. ........................................

४) भक्तिप्रियः कः ?

उ. ........................................

**II संयोजयत।**

| | अ | आ | उत्तराणि |
|---|---|---|---|
| १) | आत्मजा | आञ्जनेयः | .............. |
| २) | अमरः | आदित्यः | .............. |
| ३) | मारुतिः | देवः | .............. |
| ४) | सूर्यः | पुत्री | .............. |

@KTBS NOT TO BE REPUBLISHED

## III विरुद्धार्थकं पदं लिखत।

1) दक्षिणः x [ ]    3) प्रियः x [ ]

2) सुखम् x [ ]

## IV आम् / न इति लिखत ।

१) रघुनन्दनस्य पुरतः लक्ष्मणः अस्ति। [ ]

२) सूर्यदेवः श्वेतवर्णरथारूढः भवति । [ ]

३) गुरोः परतरं नास्ति। [ ]

## V संयुक्ताक्षरं चित्वा लिखत।

उदा → भक्तेभ्यः [क्ते] [भ्यः]

नास्ति → [ ]

लक्ष्मणः → [ ]

## VI विभज्य लिखत ।

उदा → सुखदायकः = स्+उ+ख्+अ+द्+आ+य्+अ+क्+अः

रथमारूढम् =

रघुनन्दनः =

**भाषाभ्यासः**

✻ विविधदेवतानां स्तोत्राणि पठत। ✻ प्रार्थनायाः महत्त्वं जानन्तु।

⌘⌘⌘⌘⌘⌘

@KTBS NOT TO BE REPUBLISHED

द्वादशः पाठः

# शरीरस्य अङ्गानि

मनुष्यस्य प्रधानं अङ्गं शिरः । शिरसि केशाः सन्ति। मुखे ललाटम्, भ्रूः, नेत्रे, कर्णौ, नासिका, कपोलः, ओष्ठौ च सन्ति। नेत्राभ्यां वयं पश्यामः। कर्णाभ्यां वयं श्रुणुमः। नासिकया गन्धं जिघ्रामः। आस्येन वयं वदामः। मुखस्य अधः कण्ठः अस्ति । तेन गायकाः गायिकाः च मधुरं गायन्ति।

शररिस्य मध्यभागे पार्श्वयोः स्कन्धौ स्तः। श्रवणकुमारः स्कन्धाभ्यां अन्धपितरौ नीतवान्। द्वौ हस्तौ स्तः । हस्ताभ्यां कार्यं कुर्मः। प्रत्येकस्मिन्नपि हस्ते पञ्च अङ्गुल्यः सन्ति। अङ्गुलीषु नखाः सन्ति। वक्षस्थले हाराः धार्यन्ते। आहारेण उदरं पूरयामः । अधोभागे कटिः वर्तते। कटिसूत्रे वस्त्रं बध्नामः।

शरीरस्य अधोभागे ऊरू, जानुनी, जङ्घे, पादौ च सन्ति। भीमः दुर्योधनस्य ऊरुभङ्गं कृतवान्।

पादाभ्यां नरः चलति, धावति, कूर्दति, उपविशति, उत्तिष्ठति च।

©KTBS NOT TO BE REPUBLISHED




©KTBS NOT TO BE REPUBLISHED

# शिशुगीतम्

एहि सुधीर! एहि सुविक्रम!
खेलनाङ्गणं गच्छाम।
धावनकूर्दनचलनैः खेलैः
वज्रकायतां विन्दाम ।।१।।

एहि सुशीले ! एहि मृणालिनि!
पुष्पवाटिकां गच्छाम।
विविधैः कुसुमैः विधाय मालां
विघ्नविनाशकमर्चाम ।।२।।

एहि दिनेश! प्रणव! गणेश!
ज्ञाननिधिं सञ्चिनुयाम।
एहि शारदे! गिरिजे! वरदे!
ज्ञानवारिधौ विहराम ।।३।।

तन्वा मनसा हितं चरन्तः
सदा गुरून् अनुगच्छाम।
भारतमातुः सेवासक्ताः
देशहितार्थं जीवाम ।।४।।

**- जनार्दन हेगडे**

**भाषाभ्यासः**

✻ अन्यानि शिशुगीतानि संगृह्य गायत।

@KTBS NOT TO BE REPUBLISHED

### त्रयेदशः पाठः

# परिवारः

समीरः इति एकः बालकः । अद्य समीरस्य जन्मदिनम्। तस्य माता पिता, पितामही, पितामहः, अग्रजः, अग्रजा, अनुजा च। एते सर्वे तस्य जन्मदिनम् सन्तोषेण आचरन्ति।




@KTBS NOT TO BE REPUBLISHED




©KTBS NOT TO BE REPUBLISHED




**श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् । आयुष्यं तेज आरोग्यं ददातु जगदीश्वरः ।।**



@KTBS
NOT TO BE REPUBLISHED

# जन्मदिनस्य गीतम्

शुभमस्तु शुभमस्तु

तव जन्मदिने

शुभमस्तु।।

यच्छतु यच्छतु देव
विद्यां बुद्धिं श्रियं बलम्।
यच्छतु यच्छतु देव
स्वास्थ्यं ज्ञानं आयुर्यशः।। शुभमस्तु.....

माता वदति पिता वदति। शुभमस्तु....
मातामही वदति पितामहः वदति। शुभमस्तु....
अग्रजः वदति अग्रजा वदति। शुभमस्तु....
अनुजः वदति अनुजा वदति। शुभमस्तु....

ज्येष्ठः वदति कनिष्ठः वदति। शुभमस्तु...
बन्धुः वदति मित्रं वदति। शुभमस्तु....

@KTBS
NOT TO BE REPUBLISHED

## बान्धवाः

माता = ತಾಯಿ, पिता = ತಂದೆ, पुत्रः = ಮಗ, पुत्री = ಮಗಳು, अग्रजः = ಅಣ್ಣ, अग्रजा = ಅಕ್ಕ, अनुजः = ತಮ್ಮ, अनुजा = ತಂಗಿ, पितामहः = ಅಜ್ಜ, पितामही = ಅಜ್ಜಿ, पौत्रः = ಮೊಮ್ಮಗ, पौत्री = ಮೊಮ್ಮಗಳು.

## अभ्यासः

**I. उदाहरणानुसारं वाक्यं लिखत।**

उदा → कृष्णस्य पिता वसुदेवः। वसुदेवस्य पुत्रः कृष्णः।

| अ | | आ |
|---|---|---|
| कृष्णः | → | वसुदेवः |
| रामः | पिता | दशरथः |
| गणेशः | पुत्रः | शिवः |
| विवेकानन्दः | ← | विश्वनाथः |
| गान्धीमहोदयः | | करमचन्दः |

उ. ..........................................................................

उ. ..........................................................................

उ. ..........................................................................

उ. ..........................................................................

@KTBS NOT TO BE REPUBLISHED

उ. ..............................................................

उ. ..............................................................

उ. ..............................................................

उ. ..............................................................

उ. ..............................................................

उ. ..............................................................

## II. उदाहरणानुसारं वाक्यं लिखत।

उदा : गिरिजायाः पुत्रः गणेशः। गणेशस्य माता गिरिजा।

| अ | | आ |
|---|---|---|
| गिरिजा | | गणेशः |
| कौसल्या | → | रामः |
| सुमित्रा | पुत्रः | लक्ष्मणः |
| सीता | माता | लवः |
| पृथा | ← | पार्थः |
| राधा | | कर्णः |

©KTBS
NOT TO BE REPUBLISHED

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

उ. ..........................................................

@KTBS
NOT TO BE REPUBLISHED

## III. व्यक्तिपरिचयः

मम नाम ..................................।

मम पितुः (जनकस्य) नाम ..................................।

मम मातुः (जनन्याः) नाम ..................................।

मम शालायाः नाम ..................................।

मम नगरस्य नाम ..................................।

मम मण्डलस्य नाम ..................................।

मम राज्यस्य नाम ..................................।

मम देशस्य नाम ..................................।

* * * *

@KTBS
NOT TO BE REPUBLISHED